उपलब्ध प्रमाणों से ऐसा प्रतीत होता है कि भारत स्वतंत्र बांग्लादेश के लिए संघर्षरत स्वतंत्रता सयंनानियों को सहायता करने को कृतसंकल्प था। प्रारम्भ में भारत सरकार सैनिक कार्यवाही करने या पाकिस्तान के साथ सैनिक संघर्ष करने के पक्ष में नहीं थी। प्रसिद्ध ब्रिटिश पत्र डेली टेलीग्राफ के रिपोर्ट को उद्धृत करते हुए पाकिस्तानी सामाचार पत्र द डॉन न लिखा कि बांग्लादेश की तथाकथित सरकार सिर्फ कलकत्ता में स्थित है तथा भारतीय जनसम्पर्क पदाधिकारी इसे स्वतंत्र सरकार के रूप में प्रचारित कर रहे हैं।[11]

मई प्रारम्भ होते–होते भारत ने बांग्लादेश की सेना को प्रशिक्षण देना प्रारम्भ कर दिया और अप्रत्यक्ष रूप से बांग्लादेश की औपबंधिक सरकार को पूर्वी पाकिस्तान में गुरिल्ला युद्ध प्रारम्भ करने में समर्थन करना प्रारंम्भ कर दिया।[12]

## संदर्भ–सूची :


1. जॉन जी स्टोसिंगर, द माइट ऑफ नेशन्स, वर्ल्ड पॉलिटिक्स इन आवर टाइम्स (न्यूयार्क 1975), पृष्ठ 101–102
2. लोकसभा परिचर्चा वोल्यूम–2, संख्या–3, 21 मई 1971 पृष्ठ 220
3. अंजू एस० आदयाय, सेल्फ डिटरमिनेशन इन वर्ल्ड पॉलिटिक्स इमरजेन्स ऑफ बांग्लादेश (लोकप्रकाशन इलाहाबाद 1984), पृष्ठ 99
4. सुमति गांगूली, द ऑरिजिन ऑफ वार इन साथ एशिया, (लंदन 1986) पृष्ठ 248
5. श्री० ए9व० चौधरी, बांग्लादेशः व्हाई इट हैपेन्डर? इन्टरनेश्नल अफेयर्स (भास्को वाल्यूम 48, 1972, पृष्ठ 248)
6. एस० ए० खालिक, पाकिस्तान : पीस एण्ड वार, लंदन 1978 पृष्ठ 5
7. इंदिरा गांधी, इंडिया एण्ड बांग्लादेश, ओरियन्ट लांगमेन नई दिल्ली, 1972 पृष्ठ 9–10
8. बांग्लादेश इकोमेन्ट्रस, भारत सरकार प्रकाशन मंत्रालय, 1971 पृष्ठ 669–670
9. द इंडियन नेशन, पटना 6 अप्रैल 1971
10. द इंडियन एक्सप्रेस, बाम्बे 30 मार्च 1971
11. द डॉन, 22 अप्रैल 1971
12. अरुण भट्टाचार्यी, डेट लाईन, मुजीब नगर विवारन प्रकाशन दिल्ली, 1972, पृष्ठ 124–125


****

# सर्वं खल्विदं ब्रह्म

श्रीमन् नारायण तिवारी*

सर्वा उननिषदः आत्मवादं प्रमुखतया चर्चन्ति। अतएव तत्र ब्रह्मैव केवलमेकमद्वितीयं तत्त्वमन्यत्सर्वं 'जागतिकवस्तुजातमयर्थार्थ मिथ्यारूपमिति शंकरमतं तत्र कोष्ठतोऽनेकधोपदिस्टमस्ति। तथहि छान्दोम्योपनिषत् कथयतिसर्व खल्विदं ब्रह्मेति'। एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चेति'। एवं' स एवाधस्तात् स उपरिष्टात् पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः' इत्युक्त्वा साधमात्मैवेदं सर्वमिति च प्रतिपादयति। मुण्डकोपनिशदप्यनुवक्तीमां कथाम्। 'ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चात् ब्रह्म दक्षिणश्चोतरेणाधश्चोर्ध्वं प्रसृतम् इति।

श्वेताश्वतरोऽपि – यस्मात्परं नापरमस्ति किंचिदिति वचनेन तदुपोऽलयति।

वृहदारण्यकोपनिषदि–इंद सर्व यदयमात्मेति' ब्रुवन् ''न तु तद् द्वितीयमस्ति ततांऽन्यत् विभक्तं यद् पश्यत्'' नान्यदतोऽस्ति द्रष्टष नान्यदतोऽस्ति श्ररैतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ ''इति च प्रतिपादपति। नषसिंहोपनिषदि बृते – ''बृह्मवेदं सर्वमिति''

न केवलं ब्रह्मण एवाद्वितीयस्वमं कत्वं वोपापादयत्युपनिषत् अपि तु नानात्वमपि तस्य निषेध्यति। तथा हि कौषीतकी – '' नो एतत् नानेति '' ब्रवीति। वृहदारण्यको पनिषदि–नेह नानास्ति किंचनेति'' चोक्तिरस्ति। कठारेपनिषदि ब्रह्मण आत्मनो वा स्वरूपम् अलौकिकरूपेणा वलोक्यते।

नृसिंहोपनिषदि उत्तरस्मिन् खण्डे उक्तमस्ति नात्र काचिद्भिदा अस्ति नैवात्र काचिद् भिदा अस्ति। अत्र भिदामिन मन्यमानः मृत्योः मृत्युमाप्नोति।।

ऋग्वेदोऽपि प्रमाणमिह भवति। तत्रोक्तम् तस्मात् हान्यत् नापरः किंचनास ''इति'' पुरूष एवेदं सर्वं यच्च भूर्त यच्च भावयम् '' उतामृत्तवस्येशानो यदन्नेनाति रोहित'' च। अयमेवोपनिषदः विश्वब्रह्मवादः समयस्ति। अथात् अस्मिन् विश्वे केवलं ब्रह्मण एव पारमार्थिकमस्तित्वं विघते। अयमेवाद्वैतवादस्याप्यर्थ इति। फलत एभिरूर्ध्व निर्दिष्टवचनैः ब्रह्मणोऽद्वैतं तत्त्वं जउस्य घटादेः, शुक्तौ रजतादेः, शशं श्रृंगादेश्च क्रमशः व्यावहारिकत्वं प्रातिमासिकत्वं तुच्छत्वचेति सुप्रसिद्धः शाड्करवेदान्तसिद्धान्तः संगच्छते। अतएव शंकराचार्यस्य गुरूचरणाः गौडपादाचार्याः माण्डूक्यकारिकाया मुक्तवन्तः।

*डी0ए0वी0 पब्लिक स्कूल थावे, गोपालगंज।

न चास्मिन् मते व्यवहारिकसत्तादेरंगीकारस्य वैयर्थ्यम्। अद्वैतसिद्धान्तावगमो हि नैव सर्वजनसाधारणः भवितु मर्हतीति कृत्वा सांसारिकव्यावहारादिनिर्वाहाय तत्सार्थकतायाः सिद्धत्वात्।

उपनिषदः सिद्धान्तममुं मनसि निधाय – कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति'' शिष्य जिज्ञासां सान्त्वयितुं मण्डकोपनिषदि गुरूपदिशति अपरया विद्ययाऽक्षरस्य ब्रह्मणो ज्ञानम्। आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनदं सर्वं विदितमिति वष्हदारण्यकोपनिषदि विस्तरेणोल्लिखितं वर्त्तते।

आत्मनः स्वरूपं वर्णयन् पितारूणिः छान्दोग्योपनिषदि श्वेतकेतुम् कथयति। यथा सौम्यैकेन लौहमणिन सर्वं लोहमयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयम् लौहमित्येव सत्यम्'' तत्र व्याख्यातं भवति यत् ''यथा सौम्यैकेन नरव निकृन्तनेन सर्वें कार्ष्णायस विज्ञातं स्यात् वाचारंभणं विकारो नामधेयं कृष्णायसमि त्येव सत्यमेव सौम्य च आदेशो भवतीति।

ऋग्वेदोऽपि कण्ठत उपदिशति – '' एकं सद्विप्रा बहुधा वदन्तीति।।'' अस्यैव ब्रह्णः विवर्तः परिणामो वा संसार इति हि वेदान्तमतेऽस्ति प्रक्रिया।

ब्रह्मपरिणामवादस्य निरूपणं बष्हदारण्यकोपनिषदि रहस्यात्मकं परिलक्ष्यते। तत्र दष्टान्तस्यापि निदर्शनं गूहम्।

अस्यैव सिद्धान्तस्य प्रतिध्वनिः ऐतरेयोपनिषद्यपि वर्तते। तथा च तत्रत्या पंक्तिः

एष ब्रह्मा एष इन्द्रः एष प्रजापतिरेते सर्वे देवाः इमनि च पञ्चमहाभूतानि पषथिवी वायुराकाश आपोज्योतीषीत्येतानि इमानि च क्षुद्रमिश्राणीव बीजानीतारणि चेतराणि चाण्उजानि च जारूजानि च स्वेदजानि चोभ्दिजानि चाश्वाः गावः पुरूषाः हस्तिनो यत् किंचेदं प्रणिजंगमं च पतत्रि च यच्च स्थावरं सर्व ब्रह्मोति''। अन्येषामपि दष्टांतानां प्रदर्शनं वष्हदारण्यको मन्त्रेषु वर्त्तते।

मषत्पिण्डे ब्रहमविर्क्तवादस्य निरूपणंमतीव रहस्यात्मकमव लोकयते। तथा तात्त्विकोऽन्यथाभावः परिणाम उच्यते। अतएव दुग्धस्य दधिरूपेण परिणति र्भवति। तत्र दुग्धस्यान्यथाभावः तालिकाः, प्रत्यक्षेणैवोपलभ्यते। तथा अतात्त्विकोऽन्यथाभावः विवर्त उच्श्ते। अतएव सदानन्देन वेदान्तसारे निगदितम् –

तात्त्विकोऽन्यथा प्रथा विकार इत्युदीर्यते<br>
अतात्त्विकोऽन्यथाप्रथा विवष्त इत्युदीर्यते।।<br>
यथा रज्जुस्तमसाच्दननस्थलें सर्परूपेणावभासते।

इहयोऽवभसः प्रंतीयते, स सर्पः विवर्तः। अत एवामुमभिलक्ष्य भागवतेऽभिहितम् –

ऋतिऽर्थं यत् प्रतीयते'' इति



कारणसमसत्ताकः परिणामः कारणविषमसत्ताकों विवर्तः वैषम्यं च संख्याकष्तम् परिणामकष्तंचेति विभावनीयम्।

वेदान्तिनां संप्रदायाः ब्रह्मणः परिणतिर्विवतोवा संसार दति विषये विवादमाना अपि परमात्मा स्वरूपस्य ब्रह्मणः आत्मनः वा एकत्वमद्वितीयत्वं च यर्थार्थमित्यत्र विमतिरहिता एव सन्ति।

यथा बटबीजे महत्तः बटवष्क्षासवस्थितिरस्ति तथैव ब्रह्मण्यस्मिन् प्रपंचं जगतस्तिष्ठतीति छान्दोग्योपनिषद् वैशद्येन कथयति।

तथा हि तत्रारूणिः श्वेतकेतुं पुत्रात्मनोऽवबोध यति–'' न्यग्रोधफलमत आरोहतीदं भगव इति, भिन्धीति, भिन्नं भगव इति। किमत्र प्श्यसीति। अवण इवमो धाना भगव इत्यासामङ्गकां भिन्धीती भिन्ना भगवा इति। किमत्र प्श्यसीति, न किंचन भव इति। तं होवाच यंवै सौम्येतमणिमाने न निभलयसे, एतस्यैव वै सौम्येषोऽणिम्नः एवं महान्यग्रोध स्तिष्ठतीति। श्रद्धत्स्व सौम्येति स य एषोऽणिमैतदात्म्यमिदं सर्व तत् सत्यं स आत्मा''।

ब्रह्मणः आत्मनो वा व्यापकतया सर्वत्र विघमानत्वेनाणुपरिमाणत्वं परममहत्परिणामत्वं वेति न कश्चिक्षेषः अणोरणीयान् महतो महीयातिति वाक्यस्योपनिषदि दष्टत्वेन तस्य चात्रैव तात्पर्यात्

व्यापकत्वं च स्वसवानाधिकरणात्यन्ता भावप्रतियोगितानवच्छेदकधर्मत्त्वं स्वसमानाधिकरण भेदप्रतियोगिताच्नवच्छेदकधर्मवत्त्वं वा। ब्रह्मणः अभावस्य भेदस्य वा कुत्राप्यसत्येन अणोरणीयान् महतो महीयानित्येतयोर्न विरोः।

न केवल मे कत्रैव कथेयमस्ति कथिता। पर विविधेष्वुपनिषदि ब्रह्मणः स्वरूपंमनेधा प्रकारणे सिद्धेऽपि एक एव ब्रह्म विविधात्मकं स्वरूपं विवर्तभावेनाधारियति। स सषष्टिप्रक्रिया महत्त्वंमादधति।

ब्रह्म बीजतः जगदुत्पत्तिकथायाः ब्रहम्णो जगतामुत्पतिः पुनरूतत्रैव जगतः संहतिश्चाभिप्रेतः। एतौ च सषष्टिप्रलयौ पौन पुन्येन जायते। तस्मादेव जगतः सिद्धयर्ति प्रवाहानादिताश मीमासकमते च बहुकालरूपालादिता। तेषां मते ईश्वरस्य ब्रह्मणोऽनग्डीकारस्य सुप्रसिद्धत्वात्। वेदप्रामाण्याम्युपगन्तष्तयस्तिकत्वं तस्मिन् सिद्धपति। सष्टौ जगत् ब्रह्मणो व्यक्तं भवति। प्रलये च तस्मिन् लयं गच्छति। सूर्याचन्द्रमौ धाता यथापूर्वमेल्पयत् इति। ऋग्वेदोक्तिरपि प्रवाहनादित्वां प्रमाण्यति। विषयेडस्मिन् श्वताश्वतरोपनिषदिस्त्वित्थ मुक्तम् –

एकैकं जालं बहुधा विकर्ष्वन्<br>
अस्मिन् क्षेत्रे संहरत्येषु देवः।<br>
भूयः सष्ट्वा यतयस्तथैशः<br>
सर्वार्धिपत्यं कुरूते महात्मा।।

अद्वैतसिद्धान्तेऽस्मिन् सर्वेषां मुमुक्षणां प्रथमतः प्रवेशो दुष्कर इति कष्त्वोपनिषदः सांसारिकमपि पदार्थं जीवादिकं विचारयन्ति। असत्ये वतर्मनि स्थित्वा ततः सत्यं समीहतै'' इति।

बैह्मवाचार्यमते तत्र जीवः ब्रह्मण एवांशः। तदैक्षत बहुस्यां प्रजायेयेति छान्दोग्योपनिषदः वाक्रूम्, ब्रह्मणः बहुजीवरूपेणावस्थितिसड़्ल्पं प्रतिपादयति। तथा च तत्पड़िक्तः –यथा सुदीप्तात् पावकात् विस्फुलिड्गंः सहस्तशः प्रभवन्ते स्वरूपाः इति। इत्थमेव मुण्डकोपनिषदि ब्रह्मणो विषये विशिष्टोल्लेखो वर्तते। अतएव च श्वेताश्वतरोपनिषदि।

' 'यथोग्नेः क्षुद्राः विस्फुलिग्डाः व्युच्चरन्ति एवमेवास्मादात्मनः सर्वाणि भूतानि व्युच्चरन्ति''। श्वेताश्वतरोपनिषदः शाग्ड़ रभाष्येऽपि ब्रह्मणो विशिष्टं स्वरूपमुपलभ्यते –

आकाशमेकं हि यथा घटादिषु पष्थक भवते। इति याज्ञवल्क्य वचनेन औपाधिकमेदं जीवब्राह्मणोरब्डी करोति। विविधजीववादे उपाधिस्तु अन्तःकरणरूपः, एकजीववादे अवधिरूपः। वस्तुतः जीवब्रह्मैक्यरूपण य आत्मा विराजते। स औपाधिक भेद एव एकोऽपि जीव शरीर भेद भेद इव विविधात्मकं विम्बं दधात्यन्यथा स–

चन्द्र एव एकोऽपि जलभेदे विविधरूपेणावभासते।
एक एव हि भूतात्मा भमते भूते व्यवस्थितः।
एकधा बहुधा चैव दष्श्यते जलचन्द्रवत्।।
अयं च जीवो ब्रह्मणः सष्टे प्राक्षणे बहुसंख्याया

माविर्भवति उत्पद्यते वा। कतिविधेऽयं जीव इति जिज्ञासायांम्

तस्माच्च देवाः बहुधा संप्रसूताः
साध्याः मनुष्याः पशवो वयांसि।
प्राणापानौ ब्रीहियवौ तपश्च
श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च।।

एकोऽहं बहुस्याम इति च। परन्तुपनिषत् साधारण्तया चतुः प्रकारान् जीवन् स्वीकरोति। उद्भिज्जस्वेदजाण्डजजरायुज भेदेभ्यः। यद्यपि छान्दोग्योप्निषदि स्वेदजानां चचैर्व नास्ति तथा च तद्वाक्यम् –

तेषां रबल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डगं जीवजमुभ्दिज्जमिति''। तथापि ऐतरेयोपनिषदि तस्य चर्चा विघते। तथा हि दमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारूजानि च स्वदेजानि चोद्भिजानि चेति''। उभयोरूपनिषदोः विरोधपरिहाराय छान्दोग्यवाक्यस्योपलक्षणत्वमग्डीकार्यम्।

बष्हदारण्यके ब्रह्म सामपदेनाप्यभिहितमस्ति। तच्च पदं समः सर्वेषु भूतेष्विति व्युत्पत्रिकम्। यथा गीतायाम–वेदानां सामवेदोऽस्मि'' वर्त्तते। तत्र –



''यदवै समः प्लुषिण समो मशकेन समोनागेन सम एभिस्त्रिभिलाकैः समोऽनेन सर्वेण तस्माद्वेवसाम। कौषतक्युपनिषयि –

स इह कीटो वा पतंगो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा पुरूषो वा अन्यो वा एतेषु स्थानेषु प्रयाजायते यथाकर्म यथाविद्यमिति।

एवमेव कठोपनिषद्युपन्यस्मतम्। नद्यो यथा समुद्रं गत्वा स्वातन्त्रयं जहति तथैवानिर्देश्यरूपेण सकलं चराचरं प्रलये ब्रह्मणि लीयते। पुनश्च सष्टौ सत्यां स्वतन्त्रयं लब्ध्वा विविधेषु शरीरेषु आंधतिष्ठान्तीति छान्दोग्योपनिषदि भणितम्।

शाग्ड़रभष्ये ''शास्त्रायोनित्वात्'' इति सूत्राव्याख्यायां च। तथा हि '' इमाः सौम्य नद्यः पुरास्तात् प्राच्यं स्पन्दते पश्चात् प्रतीच्यस्ताः समुद्रात् समुद्रमेवापियन्ति समुद्र इव भवन्ति ता तथा तत्र न विदुरियमहामस्मिः इयमहमस्मीति। एवमेव खलु सौम्य इमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति। पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरूषः आविशत्'' इत्यापि प्रमाण्यति ब्रह्मण एव जीवो अयमेव मनुष्यलोकः। अस्मादूर्ध्वं भुवर्लोकः स्वर्लोकस्च यथाक्रमम्। भुवर्लोकवासिनो देवयोनयः स्वर्लोकवासिन्तस्तु देवा एव विद्यन्ते। ''अति त्रयो वावलोकाः मनुष्यलोकः, पितृलोकः, देवलोक'' इतिं पितृलोको यद्यपि यक्षगन्धर्वाप्सरसोगण सेवितमन्तरिक्ष मिति नृसिंहोपनिषद् वचनात् यक्षादयो वसन्तीति निश्चियतम्।

तथापि तत्रत्येषु विशिष्टाः अग्निष्वातदयः। अतएव भुवर्लोकः पितष्लोकपदेनोच्यते। स्वर्लोकाधिवासिन्स्तु देवा। इति सुविदितम्। परमेभ्यो लोकोभ्य ऊर्ध्वं महार्लोकस्तथा जनः तपः सत्यं च लोका इति त्रिभूमिको ब्रह्मलोको विघते तत्र निवासिनस्तु वेदेऽभिहिताः देवाः इन्द्रवरूणचन्द्र सूर्यवाप्वादयः। अतएव मुण्डकोपनिषद् कथयति। –

तस्माच्च देवाः बहुधा संप्रसूताः'' इति।।
सांख्यदर्शनानुसष्त्य विविधाः विद्वान्स इत्थमेवा कथ्यन्ति।
यथा सांख्यकारिका कारेश्वरकष्ष्णेनोक्तम् –
अष्टविकल्पो देवैस्तैयायोनश्च पंचधा भवति।।
मानुष्यचैकविधः समासतो भौतिकः सर्ग।।

महामहोपाध्याय फणिभूषणतर्कवागी शचरणास्तु न्यायपरिचये कथयति –'' अहं ब्रह्मास्मि'' तत्वमसीत्यादिश्रुतिवाक्येम्यः वेदान्तमतं जीवब्रह्मणोरभेदवाद मेव न प्रतिपादयति। अपि तु अहं ब्रह्मास्मीति ध्यानस्य कर्तव्यतामुपदिशति। तथा सति न्यायवैशेषिकसंप्रदायस्य द्वैतवादसिद्धान्तबीजमपि तत्रौपनिषत्वेव निहितं विघते। अत एवात्मापसनायाः विधाम एव एतादृश श्रुतिवाक्यस्य तात्पर्यं संगच्छते। यथोपनिषदमाधारीकृत वेदान्तिन अद्वैतवादं साध यन्ति, तथा नैयायिकादयोऽपि तद्बलेनैव द्वैतसिद्धन्तुपपादयन्ति।

तथाहि यद्यपि छान्दोग्योपनिषदि षष्ठाध्याये आरूणिश्वेतकंतुसंवादे–सदैव सौम्येदमग्र आसीत् एकमेवाद्वितीय ''मितयाद्युपक्रम्य–स य एषोऽणिमेतदात्म्य मिदं सर्व तत् सत्यं स आत्मा 'तत्वमसि श्वेतकेतौ'' इत्युपसंहृत्या जीवब्रणोिरभेदः जीवः इश्वरमुपास्य निःश्रेयसं लब्धुं शक्नोतीति श्रुतितात्पर्येण द्वैतवादं समर्थयन्ति नैयायिकाः। तथा हि यथा वृषोत्सर्गावसरे वृषमुद्दिश्य ''धर्मोऽसि त्वं चतुष्पादः'' इत्याभिधते यजमानः। तत्र वृषः धर्मस्तु नास्तीति सर्वजनविदितम्, किन्तु धर्मभावनयां तस्मिन्वसरे वृषपूजा भवत्विति तद्वाक्याभिप्रायः।

एवं सर्ववाद्यमयी धण्टेति ''वाक्यं भ्रूयते। तत्र धण्टारवेण सकलवाद्यध्वनिः न गतार्थे भवति। किन्तु वाघान्तराभावे कस्यापि वाद्यस्य स्थामे प्रतिनिधितया घण्टावाद्यं पूजकः पूजायायूपयोक्तुममर्हतीति ततात्पर्यम्। एवं ''शालग्रामः स्वयं हरि रिति श्रूयते। तत्र विष्णुदेवतायाः प्रतीकतया गष्ह्माण शिला विष्णुस्तु नास्तीति ज्ञातचएत् किन्तु भक्तिपरवशो धार्मिकजन्स्तां शीलां हरि भावनया पूजयित्वा सफलमनोरथो भवतीति तद्वाक्यं संगच्छते।

एवं वेदान्तिनामद्वैतप्रतिपादिकाः श्रुतयः सर्वं खल्विदं ब्रह्म, ब्रह्मैवेदं सर्वम्। एतदात्म्यामिदं सर्वम्, सर्वं ब्रह्ममयं जगदिति ब्रह्मरूपमीश्वर मुपासितुं जीवमुपदिश तीति एष एव निर्गालितार्थस्तचछ्तीनाम् न तु अद्वैत–प्रतिपादने तस्य श्रुतिवाक्यजातस्य तात्पर्यम।

अत एव च 'पष्थगात्मनं प्रेरितारं च मत्वा। जुष्टस्ततस्तेनामष्तत्वमेतीति ''मन्त्रः जीवब्रह्मणोभेर्दं कण्ठतः साध्यति। यतो हि आत्मानं प्रेरितारं चान्तर्यामिणे परमात्मनं च पष्थक् भिन्नं मत्वा–ज्ञात्वा तेन ज्ञानेनाभष्तर्त्व मोक्षमेति सरलतया ज्ञांतु कश्चिदपि प्रभवति। तस्मान्निजात्मना सह परमात्मनोरभेददर्शमं नास्ति मुक्ति कारणमिति निष्पन्नम् न केवलमेकत्रैवापि तु पौनः पुन्येन द्वैतवादमपि कथयतीयमुपनिषत् –

ज्ञाज्ञौ द्वावजावीशानीशौ '' इति मन्त्रोऽप्युक्तकथां समर्थयति। अत्र द्वाविति पदं सर्वथा अद्वैतनिषिधमेवाभिप्रैति। तेन सहजाविति पदन्तु जीवात्मपरमात्मनोद्वैतंमनादिसत्यमिति निर्गलितार्थं'' स्पष्टयति।

श्वेताश्वतरोपनिषदि नीवब्रहम्णोर्दैतवादष्य निगूढ़ं रहस्यं प्रतिपादितम्। गौणं भेदमडंगीकृत्याद्वैतसिद्धन्तरक्षा तु सर्वथा कष्टकल्पनेव, न तु केवलमेकतैवोपनिषदि द्वैतवादस्य चर्चा विघते। अपि तु विविघासूपनिष्त्सु विभिन्नेषु प्रसंगेषु च तद् दृश्यते।

यथा श्वेतरावतरे क्षराक्षरचर्चा, कौपीतक्याम्– ''एष एव हि साधुकर्मं कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष हमोवासाधुकम्र कारयति तं यमेभ्योऽधो निनीषते द्वति वाक्ये प्रयोऽयकर्तर्जीवस्य प्रोयजक कर्तुः परमेश्वरस्य च कण्ठत उपादानमुभयोर्भदं साध्यत्येव। अत एव यत्राभिध्या वृत्या सारल्येनार्थबोधो भवति तत्र लक्षणां कल्पयित्वा



तद्विपरीतार्थबोध करणं नैव धीधनोचितां प्रशंसामर्जितुमर्हतीति विद्वभ्दिः स्वमतप्रतिपादने दुराग्रहो न कार्यः सर्वोपनिषदो गावः दोग्धा गोपालनन्दनः।

पार्थो वत्सः सुधीर्भोक्ता दुगधं गीतामष्तं महत्।।

अनेन ज्ञायते यत् सर्वासामुपनिषदां सरतत्वं गीतावर्तते। तत्र भगवदगीताऽपि यथा शाग्ड़क रभाष्यदृष्ट्याऽद्वैतवादमभिलक्ष्य विदुषां समक्षमायाति तथैव सरलया रीत्या द्वैतवादमपि पुष्णाति।

भगवतः कष्णस्योक्तौ अहं त्वमिमे इत्यादि पदैस्तथा सर्वे वयमिति बहुत्वबोध ाकवचनेन च विविधजीवानां परमात्मपनश्च परस्परं भेद एवं सिद्धयति।

अन्यथा एकाम्वादे सति सर्वशब्दस्यात्र बहुवचनप्रदप्रयोगः संगतो भवत्। रामानुजाचार्यास्तु मदुक्तिमुपौद्वलयितुमिहैवं तद्व्याख्यां कुर्वन्ति – यथाहं सर्वेश्वरः जीवात्मनोऽपि नित्या एव मन्तव्याः। एवं भगवतः सर्वेश्वरादात्मानां परस्परं भेदः पारमार्थिक इति भगवतैवोक्ममिति लक्ष्यते।

**संदर्भग्रंथः –**


1. ईशावास्योपनिषद्
2. कठोपनिषद्
3. माण्डुक्योपनिषद्
4. छान्दोग्योपनिषद्
5. वष्हदारण्यकोपनिषद्
6. वेदान्तसार पष0 – 85
7. श्वेताश्वतरोपनिषद्
8. वाक्रूपदीय – भर्तष्हरि – पष0 1059-
9. श्रीमद्भगवद्गीता – द्वितीय एवम् दषमोऽध्यायः
10. संख्यकारिका – पृ0 – 105
11. गीतामाहात्म्यम् – पृ0 सं0 – 5